International Journal of Research in Social Sciences
Vol. 9 Issue 6, June 2019,
ISSN: 2249-2496 Impact Factor: 7.081
Journal Homepage: http://www.ijmra.us, Email: editorijmie@gmail.com
Double-Blind Peer Reviewed Refereed Open Access International Journal - Included in the International Serial Directories Indexed & Listed at: Ulrich's Periodicals Directory ©, U.S.A., Open J-Gate as well as in Cabell's Directories of Publishing Opportunities, U.S.A

# शैक्षिकानुसन्धाने गुणवत्तासंवर्धनम्

डॉ.कुलदीपसिंहः
सहायकाचार्यः (शिक्षाशास्त्रम्)
ज.रा.राजस्थानसंस्कृतविश्वविद्यालयः,
जयपुरम् (राज.)

**प्रस्तावना**

अनुसन्धानं कस्याः अपि व्यवस्थायाः प्रमुखमङ्गं भवति। अनुसन्धानप्रक्रिया एव व्यवस्थायै पृष्ठपोषणं प्रदाय तस्याः परिष्कारं कुर्वती तस्याः प्रगतिं सुनिश्चिनोति। साम्प्रतं शिक्षायाः क्षेत्रेषु यथा मनोविज्ञानम्, प्रौद्योगिकी, अर्थशास्त्रम्, नियोजनम्, प्रशासनं पर्यवेक्षणं चेत्येतेषु अनुसन्धानस्य भूमिका एधमाना वर्तते। शिक्षाप्रणाल्यां नीतिगतनिर्णयानां व्यावहारिकक्रियान्वयने शिक्षानुसन्धानं महत्त्वपूर्णभूमिकां निर्वहति। शिक्षा राष्ट्रस्य विकासेन सह सम्बद्धा भूत्वा राष्ट्रस्य सामाजिक-आर्थिक-राजनैतिकादिव्यवस्थानाम् आधारशिला भवति। शैक्षिकानुसन्धानं शिक्षाप्रणाल्याः निर्बाधसञ्चालनं कृत्वा नवाचाराणां प्रोत्साहनं करोति। एतत् शैक्षिकोन्नतौ बाधकतत्त्वानां निराकरणार्थं शिक्षाजगतः मार्गदर्शनं करोति।

**उद्देश्यानि**

1. भारते शैक्षिकानुसन्धानस्य दशायाः दिशायाश्च अवगमनम्।
2. शिक्षानुसन्धानस्य क्षेत्रे कार्यरतानां संस्थानां सामान्यपरिचयप्राप्तिः।
3. शैक्षिकानुसन्धानस्य गुणवत्तासंवर्धनोपायानां चिन्तनम्।

**मुख्यशब्दाः**

शिक्षानुसन्धानम् (Educational Research), शिक्षाशास्त्रम् (Pedagogy), गुणवत्ता (Quality), शैक्षिकपत्रिकाः (Educational Journals), वित्तीयसहायता (Financial aid), नवाचाराः (Innovations)

शैक्षिकसमस्यानां शैक्षिकविचाराणां च अध्ययने वैज्ञानिकपद्धतीनाम् अनुप्रयोगः एव शैक्षिकानुसन्धानमित्युच्यते। एतस्य मुख्यं लक्ष्यं शैक्षिकविषयैः सम्बद्धानां सामान्यनियमानाम् अन्वेषणमस्ति। सहैव प्रभावपूर्णनिर्णयानां संसाधनानां समुचितोपयोगेन शिक्षणाधिगमस्य गुणवत्तासंवर्धनमपि एतस्य प्रमुखं लक्ष्यमस्ति। शिक्षानुसन्धानेन शिक्षकः सतर्कः भवति, येन सः समाजस्य

परिवर्तनशीलावश्यकतानुगुणं स्वोद्देश्यानां नवीकरणं कर्तुं शक्नुयात्। शिक्षाक्षेत्रेण सम्बद्धानां सर्वासां व्यावहारिकसमस्यानां समाधाने शिक्षानुसन्धानं साहाय्यं विदधाति।

**भारते शैक्षिकानुसन्धानस्य विकास:**

शिक्षासम्बद्धस्य अनुसन्धानस्य इतिहास: अनतिप्राचीन: अस्ति। भारते शिक्षानुसन्धानस्य समारम्भ: प्रायश: 1940 ईस्वीयवर्षात् स्वीक्रियते। तदारभ्य शिक्षानुसन्धाने नैरन्तर्येण गुणात्मकाभिवृद्धि: समवलोक्यते। गते दशके तु भारते शैक्षिकशोधसाहित्यस्य विशालभाण्डार: अस्तित्वमवाप। शैक्षिकानुसन्धानस्य विकासयात्राया: समीक्षणक्षणे त्रीणि महत्त्वपूर्णानि आस्पदानि दृष्टिपथमायान्ति, तद्यथा-

**1. विश्वविद्यालयस्तरे शिक्षाशास्त्रस्य विषयत्वेन प्रतिष्ठा**

भारते 1917 तमे ईस्वीयवर्षे कलकत्ताविश्वविद्यालये ऐदम्प्राथम्येन शिक्षाविभागस्य स्थापना बभूव। अनेन सहैव भारते विश्वविद्यालयीयस्तरे आधुनिकस्य शिक्षाशास्त्रस्य अध्ययनम् अध्यापनं च समारब्धम्। 1936 तमे ईस्वीयवर्षे बम्बईविश्वविद्यालयेन प्रथमतया शिक्षायां स्नातकोत्तरोपाधि: प्रदत्त:। 1943 तमे ईस्वीयवर्षे बम्बईविश्वविद्यालयत: एव शिक्षाशास्त्रे पीएच्. डी. इति शोधोपाधि: शोधार्थिने प्रदत्त:। वर्तमानभारते प्रायश: सर्वेष्वपि विश्वविद्यालयेषु शिक्षायां स्नातकोपाधे: स्नातकोत्तरोपाधेश्च पाठ्यक्रम: सञ्चाल्यते।

**2. शैक्षिकानुसन्धानेन सम्बद्धानां राष्ट्रियसंस्थानानां स्थापना**

स्वातन्त्र्यात्परं भारतस्य शिक्षानीतिनिर्धारकै: राष्ट्रियशिक्षाप्रणाल्या: आवश्यकता समनुभूता। अनया अनुभूत्या 'शिक्षाकेन्द्रीयसंस्थानम्' (Central Institute of Education) इत्येतेषा संस्था अस्तित्वे आगता। सैषा संस्था अखिलभारतीयस्तरे विविधसमस्यासु अनुसन्धानं कर्तुं प्रोत्साहनं विहितवती। एतत् संस्थानं शिक्षाशिक्षकेभ्य: शिक्षाकर्मिभ्यश्च उच्चस्तरीयं प्रशिक्षणं प्रदातुमपि व्यवस्थां सुनिश्चितवती। शैक्षिकसुविधानां विस्तरेण सहैव शिक्षाक्षेत्रे अनेकासां जटिलसमस्यानामपि प्रादुर्भाव: समभवत्। अस्मिन् परिदृश्ये अनेकविधानां विशिष्टसंस्थानाम् आवश्यकता अनुभूता, या: अनुसन्धानाधारे समस्यानां समाधानं कर्तुं शक्नुयुरिति। अस्मिन्नेव क्रमे 'केन्द्रीयपाठ्यपुस्तकानुसन्धानसंस्था' (Central Bureau of Textbook Research) इत्यस्या: 'केन्द्रीयशैक्षिक-तथा-व्यावसायिकनिर्देशनसंस्था' (Central Bureau of Educational and Vocational Guidance) इत्यस्या: च संस्थाया: स्थापना जाता। 1961 तमे ईस्वीयवर्षे क्रमे 'राष्ट्रीयशैक्षिक-अनुसन्धान-एवं-प्रशिक्षणपरिषद्' (National Council of Educational Research and

Training) इत्यस्याः संस्थापनेन शैक्षिकक्षेत्रे महत्त्वपूर्णकार्यं सम्पन्नम्। एतदतिरिच्य नैकानि अन्यान्यपि शैक्षिकशोधसंस्थानानि शैक्षिकादायित्वानां निर्वहणं कुर्वन्ति, तद्यथा – राष्ट्रीयशैक्षिकनियोजन-एवं-प्रशासनसंस्था (National Institute of Educational Planning and Administration), भारतीयशैक्षिकसंस्था (Indian Institute of Education) पुणे, शैक्षिक-उच्चतर-अध्ययनकेन्द्र (Central of Advanced Study in Education) बडौदा चेत्यादीनि। राष्ट्रीयशैक्षिक-अनुसन्धान-एवं-प्रशिक्षणपरिषद् (NCERT) शैक्षिकानुसन्धाय समर्पिता राष्ट्रियस्तरीया व्यापकतमा संस्थास्ति। सैषा परिषद् विविधानां संस्थानां पारस्परिकं सामञ्जस्यमपि संस्थापयति। परिषदियं वैयक्तिकस्तरे संस्थागतस्तरे च क्रियमाणानां शोधपरियोजनाकार्यक्रमाणां सञ्चालनेन सह शैक्षिकक्षेत्रस्य कार्मिकाणां प्रशिक्षणस्यापि दायित्वं निर्वहति। NCERT इति परिषदः अनुसन्धानसम्बद्धकार्यक्रमाणां सम्पोषणस्य कार्यमस्याः अङ्गभूता 'शैक्षिकानुसन्धान-एवं-नवाचारसमितिः' अर्थात् Education Resources Information Center इति समितिः पश्यति। सैषा समितिः शैक्षिकानुसन्धानस्य प्राथमिकक्षेत्राणां प्रत्यभिज्ञानं कृत्वा शोधकार्यार्थम् अनुदानं प्रददाति। NCERT इत्यस्याः परिषदः प्रमुखशोधगतिविधयः पाठ्यक्रमनिर्माणम्, शिक्षणम्, प्रशिक्षणम्, मापनम्, मूल्याङ्कनम्, शैक्षिकप्रौद्योगिकी, अनौपचारिकशिक्षा, निर्देशनसामग्रीनिर्माणं चेत्यादिषु आधारिताः भवन्ति।

साम्प्रतं NCERT इति परिषदः अनुसन्धानपरियोजनाः विशेषतया शिक्षायाः सार्वभौमिकरणम्, शैक्षिकावसराणां समानता, शिक्षायाः व्यावसायीकरणं वञ्चितवर्गाणां शिक्षा चेत्यादिषु विषयेषु केन्द्रिताः सन्ति।

### 3. वित्तीयसहायतया शोधसंवर्धनम्

स्वातन्त्र्यात्पूर्वं शोधकर्त्तारः आत्मनः स्तरे अथवा स्वयंसेविसङ्घटनानां वित्तीयसहायतया शोधकार्यं सम्पादयन्ति स्म। स्वातन्त्र्यात्परम् अस्यां दिशि नैकाः संस्थाः सक्रियाः अभवन्। प्रथमपञ्चवर्षीययोजनायां केन्द्रीयशिक्षामन्त्रालयस्य पक्षतः शोधार्थं धनानुदानं क्रियते स्म। तत्पश्चात् 'माध्यमिकशिक्षाखिलभारतीयपरिषद्' (AICSE) इत्यनया संस्थया विद्यालयीयस्तरे नवाचाराणां प्रोत्साहननिमित्तं वित्तीयसहायता प्रदीयते स्म।

साम्प्रतिके काले एता: तिस्र: संस्था: शैक्षिकानुसन्धानाय भृशं कार्यं कुर्वत्य: सन्ति। तत्र NCERT इत्येषा संस्था ERIC इति आत्माङ्गभूतसंस्थया वित्तीयमनुदानं प्रददाति। ERIC इति संस्था विविधसंस्थासु क्रियमाणानां चयनितानाम् उत्तमशोधकार्याणां कृते आर्थिकसहायतां प्रददाति।

शैक्षिकानुसन्धानस्य संवर्धने विश्वविद्यालयानुदानायोग: (UGC) महत्तमम् उत्तरदायित्वं निर्वहति। 1953 इति ईस्वीयवर्षे एतस्य आयोगस्य स्थापना सञ्जाता। एष आयोग: शैक्षिकशोधकार्याणां प्रोत्साहनार्थं प्राचुर्येण शोधछात्रवृत्तिमपि प्रददाति। सहैव आयोगोऽयं विश्वविद्यालयीयविभागानां बृहल्लघुपरियोजनानां कृतेऽपि वित्तीयमवलम्बलनमाविष्करोति। एतदिरिच्य विश्वविद्यालयानुदानायोग: प्रगतिशीलाध्ययनकेन्द्रेभ्य: विशेषसहायताप्रभागयोजनान्तर्गतत्वेन प्रतिष्ठितसंस्थाभ्य: च बृहत्-स्तरे छात्रवृत्ति:, कार्मिकाणां नियुक्ति: चेत्यादीनि सहायताकार्याण्यपि करोति।

एवमेव 'भारतीयसामाजिकविज्ञानानुसन्धानपरिषद्' (Indian Council of Social Science Research) इत्येषा संस्थापि वित्तीयसहायताया: कार्यं करोति। शैक्षिकानुसन्धानार्थं लिप्सव: सर्वेऽपि जना: विश्वविद्यालयाश्च इत: आर्थिकमवलम्बनं स्वीकर्तुं शक्नुवन्ति।

आभि: तिस्रभि: संस्थाभि: सह भारतीयायुर्विज्ञानानुसन्धानसंसाथनम् (Indian Council of Medical Research) भारतीयैतिहासिकानुसन्धानसंस्थानम् (Indian Council of Historical Research) चापि शैक्षिकशोधकार्याणां निर्बाधप्रगत्यर्थं कार्यरते स्त:।

**शैक्षिकानुसन्धानस्य प्रचलितायामा:**

अत्र प्रचलितायाम: इति शब्देन तेभ्य: शैक्षिकानुसन्धानक्षेत्रेभ्य: तात्पर्यमस्ति, येषु शोधकर्त्तार: प्रामुख्येन शोधकार्यं कुर्वन्ति। एतेषां विवरणम् अधोलिखितरूपेण उपस्थापयितुं शक्यते –

1. शैक्षिकदर्शनम्
2. शिक्षाया: इतिहास:
3. शिक्षाया: समाजविज्ञानम्
4. तुलनात्मकशिक्षा
5. शिक्षाया: अर्थशास्त्रम्
6. अधिगम:, व्यक्तित्वम् अभिप्रेरणं च

7. निर्देशनं परामर्शनं च
8. परीक्षणं मूल्याङ्कनं च
9. पाठ्यक्रमः, विधिः पाठ्यपुस्तकश्च
10. भाषाशिक्षा
11. शैक्षिकप्रौद्योगिकी
12. उपलब्धिसहसम्बन्धः
13. कलाशिक्षा
14. शिक्षणं शिक्षकव्यवहारश्च
15. शैक्षिकप्रशासनं प्रबन्धनं च
16. दूरस्थशिक्षा
17. अनौपचारिकशिक्षा
18. समावेशात्मकशिक्षा
19. मूल्यशिक्षा
20. पर्यावरणशिक्षा

**शैक्षिकानुसन्धानस्य वर्तमानस्थितिः**

समाजविज्ञानस्य विषयेषु शिक्षा इत्यस्य विषयस्य विशेषतया प्रतिष्ठास्ति। एतस्य विषयस्य वैशिष्ट्यस्य संरक्षायै अनुसन्धानस्य प्रोत्साहनं समयस्य वाञ्छास्ति। यदि अद्यत्वे भारते शिक्षानुसन्धानेन सम्बद्धसाहित्यस्य समीक्षणं क्रियेत, तर्हि तत्र नवीनतायाः विविधतायाश्च न्यूनतायाः समस्याः दृग्गोचरीभवति। शोधपत्रेषु शोधग्रन्थेषु च चर्वितचर्वणमेव आधिक्येन दृष्टौ आयाति। बहुधा शीर्षकेषु न्यूनाधिकपरिवर्तनं कृत्वा कृतकार्यस्यैव प्रस्तुतिः अवलोक्यते। प्रायशः अस्मद्देशे शैक्षिकशोधनिमित्तं निश्चितशब्दावलीप्रयोगात् बहिः कार्यं कर्तुं शोधकर्त्तारः उत्साहं न प्रदर्शयन्ति। सैषा शब्दावली अथवा शैक्षिकशोधस्य सम्पूर्णं प्रारूपम् अमेरिकीमनोविज्ञानसङ्घस्य (American Psychological Association) मानदण्डानाम् अनुपालनं करोति। अस्मिन् प्रारूपे सम्बन्धविचाराणाम्, सिद्धान्तानां शोधपरियोजनानां च भारतीयपरिस्थितिषु आनुकूल्यं क्रियते। नूतनतया ये अनुसन्धातारः अनुसन्धाय प्रस्तुताः भवन्ति, ते कृतकार्याणि दृष्ट्वा प्रचलितशब्दावलीमेव शोधस्य अनिवार्यमङ्गं मत्वा ततः बहिः द्रष्टुं साहसं न कुर्वन्ति। अनेन स्वतन्त्रचिन्तनस्य नवीनलेखनस्य च भावनायाः समुदयो न जायते। अस्मिन् सन्दर्भे

International Journal of Research in Social Sciences
Vol. 9 Issue 6, June 2019,
ISSN: 2249-2496 Impact Factor: 7.081
Journal Homepage: http://www.ijmra.us, Email: editorijmie@gmail.com
Double-Blind Peer Reviewed Refereed Open Access International Journal - Included in the International Serial Directories Indexed & Listed at: Ulrich's Periodicals Directory ©, U.S.A., Open J-Gate as well as in Cabell's Directories of Publishing Opportunities, U.S.A

गुन्नारमिर्डलमहादेयस्य Objectivity in Social Research इति ग्रन्थगता टिप्पणी प्रासङ्गिगतामावहति, तद्यथा - 'समाजविज्ञानेषु विचाराणां स्पष्टतया सरलतया च प्रकटीकरणस्य महती परम्परा वरीवृत्यते, किन्तु वर्तमानसमये समाजविज्ञानेषु आत्मानम् एकस्मिन् अनावश्यकविचित्रशब्दावलीपरिधौ सीमितीकरणस्य अनावश्यकप्रवृत्तिः दृष्टिपथमागच्छति। अनेन कारणेन एते विषयाः एव परस्परम् एकोऽन्यस्य निष्कर्षान् ज्ञातुं न पारयन्ति। किं बहुना, बहुधा तु एते विषयाः आत्मनः निष्कर्षान् एव अवगन्तुं न पारयन्ति' इति। एतदुद्धरणं भारतीयशिक्षानुसन्धानक्षेत्रेऽपि चरितार्थं भवति।

प्रायशः प्रत्येकं शोधस्य त्रीणि प्रमुखचरणानि भवन्ति – उद्देश्यम्, विधिः प्राप्तिश्च इति। दौर्भाग्येन वर्तमानशोधकार्येषु एतेषां त्रयाणां चरणानां कश्चन सुसङ्गतः सम्बन्धो नावलोक्यते। अनुसन्धानकर्ता उद्देश्येषु यान् बिन्दून् लिखति, तेषां शोधस्य प्राप्तिचरणे समुल्लेखः नैव प्राप्यते। इत्थं शोधकार्यम् उपाधिपत्रमवाप्तुम् औपचारिकतामात्रमेव सिद्धं भवति। आधिक्येन शोधप्रबन्धेषु नूतनस्य विश्लेषणस्य अथवा नवीनशोधोपलब्धीनां दरिद्रता दृग्गोचरीभवति। भारते 1943 इति ईस्वीयवर्षादारभ्य 2009 इति ईस्वीयवर्षं यावत् सहस्राणां दशतः (10,000) अपि अधिकसंख्यायां शिक्षाशास्त्रे शोधोपाधयः प्रदत्ताः सन्ति। साम्प्रतमपि सैषा संख्या वर्धमानैवास्ति। किन्तु संख्यावृद्ध्या सह गुणवत्तायां वृद्धिरपि अनिवार्यतया आवश्यकी वेविद्यते। भारते शैक्षिकानुन्धानेन सम्बद्धमेव एकं विश्लेषणं तथ्यप्रकाशनं करोति यत् शिक्षाक्षेत्रे क्रियमाणानि अधिकांशशोधकार्याणि नाम्ना शैक्षिकप्रकृतेः सन्ति। अत्यन्तं न्यूनमात्रायामेव शोधकार्याणि एतादृशानि सन्ति, ये शिक्षानीतिः, शैक्षिकनिर्णयः, प्रभावः, निष्कर्षः मूल्याङ्कनप्रक्रिया चेत्यादिविषयैः सह सार्थकरूपेण सम्बद्धाः सन्ति।

यदि वयम् अन्ताराष्ट्रियस्तरे अस्माकं देशस्य शोधप्रकाशनानाम् उपलब्धेः विषये समीक्षां कुर्मः तर्हि ज्ञास्यामो यत् वैश्विकस्तरे प्रमुखानां श्रेष्ठपञ्चानाम् अन्ताराष्ट्रियशैक्षिकप्रकाशकानां तद्यथा टेलर एण्ड फ्रांसिस (Taylor and Francis), विली (Wiley), सेज् (Sage), स्प्रिंगर (Springer), एल्सवियर (Elsevier) इत्येतेषां पक्षतः प्रकाशितपत्रिकासु (Journals) भारतीयपत्रिकाणां प्रतिभागिता केवलं 0.5% इत्येवास्ति। अन्ताराष्ट्रियस्तरे भारतीयपत्रिकाणां सूचीबद्धता (Indexing) नगण्यैवास्ति। ERIC (Education Resources Information Center) इत्यत्र सम्पूर्णविश्वस्य श्रेष्ठशैक्षिकपत्रिकाः सूचीबद्धाः सन्ति, तत्र भारतस्य केवलं 4 पत्रिकाः एव स्थानं प्राप्तवत्यः सन्ति। एवमेव SSIC (Social Science Index Citation) इत्यत्र आहत्य 217 पत्रिकाः सूचीबद्धाः सन्ति, किन्तु भारतस्य एकापि पत्रिका तत्र स्थानं न प्राप्तवती।

राष्ट्रियस्तरे यदि शोधपत्रिकाणां प्रकाशनानां सम्बन्धे अवलोकनं क्रियेत, तर्हि संख्यात्मकदृष्ट्या तु सन्तोष: भवति, किन्तु गुणवत्ताया: मानदण्डे काश्चन विरला: पत्रिका: एव उल्लेखनीया: भवन्ति। भारते शोधगर्भप्रकाशनस्य मानदण्डानाम् अनुपालनं कुर्वतीनां शोधपत्रिकाणां प्रत्यभिज्ञानं कर्तु Indian Citation Index (ICI), Indian Journals, NCERT चेत्यादीनि अभिकरणानि उल्लेखनीयानि सन्ति। AIAER Report (2015) इति प्रतिवेदनस्य आधारे अधोलिखितरूपेण गुणवत्तापूर्णशैक्षिकपत्रिकाणां संख्यां निष्कर्षत्वेन ज्ञास्याम:, तद्यथा-

| भारते प्रकाशिता: गुणवत्तापूर्णा: मुख्या: शैक्षिकपत्रिका: | |
|---|---|
| **स्रोत:** (Source) | **पत्रिकाणां संख्या** (Number of Journals) |
| Indian Citation Index | 24 |
| Indian Journals | 09 |
| NCERT | 06 |
| Others | 01 |

विश्वे बृहत्तमाम् उच्चशिक्षाप्रणालीं ध्रियमाणस्य देशस्य कृते सैषा संख्या अत्यल्पैव वक्तव्या। एवं हि शैक्षिकानुसन्धानम् अद्यत्वे एकं प्राणहीनम् अनुष्ठानं प्रतिभाति, यस्य घोषितोद्देश्येषु वास्तविकोपलब्धिषु च महत् अन्तरमस्ति।

**शैक्षिकशोधस्य गुणवत्तायाम् अभिवृद्धिं कर्तुम् उपाया:**

यद्यपि साम्प्रतमस्यां दिशि UGC, NCERT चेत्यादिभि: संस्थाभि: नैके उपाया: क्रियमाणा: सन्ति, तथापि शिक्षाशास्त्रस्य अनुसन्धानकर्मणि गुणवत्तोन्नयनाय निम्नाङ्किता: उपाया: अपि फलप्रदा: भवितुमर्हन्ति, तद्यथा –

1. विश्वविद्यालयस्य कार्यं ज्ञानवितरणेन सह ज्ञानस्य सर्जनमपि अस्ति। विश्वविद्यालयस्तरे शिक्षणं शोधश्च इत्येतत् द्वयमपि परस्परं पूरककार्यं भवति। भारते उच्चशिक्षाया: कृते संसाधनयुक्तानां

**International Journal of Research in Social Sciences**
Vol. 9 Issue 6, June 2019,
ISSN: 2249-2496 Impact Factor: 7.081
Journal Homepage: http://www.ijmra.us, Email: editorijmie@gmail.com
Double-Blind Peer Reviewed Refereed Open Access International Journal - Included in the International Serial Directories Indexed & Listed at: Ulrich's Periodicals Directory ©, U.S.A., Open J-Gate as well as in Cabell's Directories of Publishing Opportunities, U.S.A

श्रेष्ठसंस्थानां प्रतिष्ठापनाया:, तत्र गुणवत्तास्तरस्याभिवृद्धे: उच्चमानदण्डानामाधारे च अनुसन्धानकार्याणां च विधानस्य महती आवश्यकता वेविद्यते।

2. शिक्षाया: ज्वलन्तसमस्या: विषयीकृत्य शोधकार्यं कर्तुं प्रोत्साहनं प्रदातव्यम्। उदाहरणार्थं महतां शैक्षिकचिन्तकानां जीवनम्, तेषां कार्यानुभवानां प्रकाशनम्, पाठ्यचर्याया: मूल्याङ्कनम्, प्राच्यपाश्चात्यशिक्षापद्धतीनां तुलनात्मकमध्ययनम्, विविधदेशानां शैक्षिकव्यवस्थानां समीक्षणम्, छात्रराजनीति: चेत्येदृशेषु विषयेष्वपि अनुसन्धानं भवेत्।
3. शोधस्य विधिषु उपकरणेषु च सार्थककार्यशालानां माध्यमेन अनुसन्धानरतानां जनानां मार्गदर्शनं करणीयम्। शोधार्थिन: क्षमता, शोधविषयस्य निर्धारणम्, शोधप्रक्रिया, निष्कर्षाणां क्रियान्वयनं चेत्येतेषु विषयेषु गाम्भीर्येण जागरूकतया च अवधानं स्यात्।
4. साम्प्रतं यानि शोधकार्याणि क्रियमाणानि सन्ति, तेषां समुचितमूल्याङ्कनं कर्तुम् उत्तमा व्यवस्था भवेत्।
5. शिक्षाक्षेत्रे गाम्भीर्येण अनुसन्धानं कर्तुं जनानाम् अल्पतापि काचित् महती समस्यास्ति। एतदर्थं विश्वविद्यालयै: साक्षात्कारादीनां माध्यमेन योग्यतमानाम् अनुसन्धानोत्सुकानां छात्राणां चयनं कर्तव्यम्।
6. शैक्षिकशोधकार्याणां दुरवस्थाया: एकं कारणं समुचितमार्गदर्शनस्य अल्पतापि अस्ति। यदि मार्गदर्शको विषये सर्वथा निपुणो भवेत्, तर्हि शोधकार्येषु अविलम्बेनैव गुणवत्ताया: सन्धानं कर्तुं शक्यते।
7. विश्वविद्यालयै: अनुसन्धानसहायताकोषस्य स्थापना कर्तव्या, येन मेधाविनां शोधार्थिनां कृते आर्थिकसहायता सम्भवेत्।
8. साम्प्रतं प्रचलितशोधकार्याणि शिक्षाप्रणाल्या: आवश्यकताभि: समस्याभिश्च युक्तानि स्यु:। येन शैक्षिकसमस्यानां व्यावहारिकं समाधानं निर्गच्छेत्। एतदर्थं नवाचाराणां कृते प्रोत्साहनं प्रदातव्यम्।

अस्माकं देशे उत्कृष्टं शोधकार्यं कर्तुं सकारात्मकपरिस्थितय: सन्ति। आवश्यकतास्ति यत् शोधकार्यं प्रति गाम्भीर्येण गुणवत्तोन्नयनप्रयास: स्यात्, येन शोधकार्यमेकम् औपचारिकतामात्रं न तिष्ठेदिति। यदि एतादृशा: उपाया: क्रियान्वयीक्रियन्ते, तर्हि अवश्यमेव भारते अनुसन्धानकर्मणि गुणवत्ताया: संवर्धनं निश्चप्रचं भवेदिति।

## उपसंहार: निष्कर्षश्च

शोधकार्यं संख्यात्मकदृष्ट्या न्यूनं भवतु नाम, परन्तु तत् तथ्याधारितं गुणवत्तायुक्तं भवेत्। अनुसन्धानलिप्सूनां मार्गदर्शकानां च यथासमयं प्रशिक्षणं मूल्याङ्कनं च भवेत्। शोधकार्यार्थं संसाधनानाम् अल्पता दूरीकरणीया। विविधानां विश्वविद्यालयानां संसाधनानां पारस्परिकम् आदानप्रदानं सारल्येन स्यात्। शोधप्रकाशनस्य उच्चतममानदण्डानां दृढतया पालनं स्यात्। अन्त:शास्त्रीयम् अनुसन्धानं कर्तुं प्रोत्साहनं भवेत्।

## सन्दर्भग्रन्था:


1. Bhattacharjea, Suman (1990); The Landscape of Educational Research in India, An Exploratory Study, Harvard Graduate School of Education
2. Krishna Kumar (2017), Routledge Handbook of Education in India : Debates, Practices, and Policies, Taylor & Francis
3. Pradeep Kumar Choudhury, Suresh Babu G.S (2021); Contextualising Educational Studies in India, Research, Policy and Practices, Taylor & Francis
4. Dibakar kundu (2011); Advances in educational research in india, Neha Publishers & Distributors
5. Myrdal, Gunnar (1898) Objectivity in Social Research, New York Printdisabled.
6. Ellen Condliffe Lagemann (1999); Issues in Education Research: Problems and Possibilities
7. Jean Rudduck (1998); Challenges for Educational Research, SAGE Publications Ltd